# Shri Surya SahasranAma Stotram from Skanda Purana

# શ્રીસૂર્યસહસ્રનામસ્તોત્રમ્ સ્કન્દપુરાણાન્તર્ગતમ્

## Document Information


Text title : Surya Sahasranama Stotram

File name : sUryasahasranAmastotram3.itx

Category : sahasranAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : DPD

Proofread by : DPD

Description/comments : Skanda Purana, See corresponding nAmAvaliH

Latest update : October 30, 2020

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2020

*sanskritdocuments.org*

# શ્રીસૂર્યસહસ્રનામસ્તોત્રમ્ સ્કન્દપુરાણાન્તર્ગતમ્

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

વિનિયોગઃ એવં સંકલ્પવાક્યઃ -
અસ્ય શ્રીસૂર્યસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય આદિત્યોપાસકઃ
શ્રીસૂર્યવર્ચા ઋષિઃ । શ્રીમદાદિત્યનારાયણો દેવતા બ્રહ્મવર્ચસ્વિતા
મૂલમિતિ બીજમ્ । સર્વપાપવિનાશક ઇતિ શક્તિઃ । અગ્નિશ્ચ જાતવેદાશ્ચેતિ
પરમો મન્ત્રઃ । હૃદ્રોગહારીતિ કીલકમ્ । નિષઙ્ગી કવચીત્યસ્ત્રમ્ ।
ભક્તરક્ષણતત્પર ઇતિ કવચમ્ । શ્રીમદાદિત્યપ્રસાદસિદ્ધ્યર્થે
જપે વિનિયોગઃ ॥

વિભિન્ન ન્યાસાઃ -
આદિત્યોઽદિતિદેવ ઇત્યઙ્ગુષ્ઠાભ્યાં નમઃ ।
મન્ત્રો યન્ત્રં તથા ક્ષેત્રમિતિ તર્જનીભ્યાં સ્વાહા ।
ગાયત્રીવલ્લભઃ પ્રાશુરિતિ મધ્યમાભ્યાં વૌષટ્ ।
છન્દોમયઃ શાસ્ત્રમય ઇત્યનામિકાભ્યાં હુમ્ ।
સુબ્રહ્મણ્યશ્ચ સૂરીન્દ્ર ઇતિ કનિષ્ઠિકાભ્યાં વષટ્ ।
સુરભૂસુરદત્તાર્ઘ્યશુદ્ધામ્બુગ્રહણેરત ઇતિ
કરતલકરપૃષ્ઠાભ્યાં ફટ્ ।
હૃદયાદિન્યાસં ચ એવં કુર્યાત્ ॥

સૂર્યદેવધ્યાનમ્ -
આદિત્યસ્ત્વાદિદેવોઽયં ભાસ્કરો ભવનાશનઃ ।
વિશ્વમૂર્તિર્વિશ્વનેતા ચિન્મૂર્તિશ્ચિન્તિતાર્થદઃ ॥

ઇતિ ત્રિવારં પઠેત્ તત્સ્સહસ્રનામપારાયણં કૃત્વા,
ઉત્તરન્યાસં કૃત્વા આદિત્યાયાર્પયેત્ ॥

મણ્ડલસ્ય ચ વિસ્તારં નમસ્કારવિધિં તતઃ ।

પૂજાક્રમવિશેષેણ શ્રુત્વા પુનરભાષત ।
સર્યવર્ચા ઉવાચ -
ભગવન્ સર્વતત્ત્વજ્ઞ સર્વકર્મપ્રવર્તક ।
નામ્નાં સહસ્રં દિવ્યાનાં શ્રોતુમિચ્છામ્યહં રવેઃ ॥

બૃહસ્પતિરુવાચ -
સૂર્યવર્ચઃ શ‍ૃણુ પરં સૂર્યસ્ય ચ મહાત્મનઃ ।
ઉત્તમં નામસાહસ્રં યત્તમસ્તે નિકૃન્તતિ ॥

બૃહસ્પતિસ્સભગવાનિત્યુક્તસૂર્યવર્ચસમ્ ।
ધ્યાત્વા નારાયણં દેવં ભાનુમણ્ડલમધ્યગમ્ ॥

અથ શ્રીસૂર્યસહસ્રનામસ્તોત્રમ્ ।
ૐ આદિત્યશ્ચાદિદેવોઽયં ભાસ્કરો ભવનાશનઃ ।
વિશ્વમૂર્તિર્વિશ્વનેતા ચિન્મૂર્તિશ્ચિન્તિતાર્થદઃ ॥ ૧॥

સદ્યોજાતો વામદેવસ્સર્વપાપવિનાશકઃ ।
વેદ્યો વૈદ્યસ્સદાયોગી વિશ્વકર્મા વિભાવસુઃ ॥ ૨॥

વિરિઞ્ચિર્વિશ્રુતાત્મા ચ વિશ્વસર્ગપ્રવર્તકઃ ।
વિદ્યાત્મા વિષયજ્ઞશ્ચ વિશ્વાત્મા વિશ્વપાપહા ॥ ૩॥

વિદુષામીશ્વરો વિદ્વાન્વિશ્વનેતા વિશેષવિત્ ।
વીરહા વિષયશ્શૂન્યો વાલખિલ્યાદિવન્દિતઃ ॥ ૪॥

વામનો વરદઃ પ્રાંશુર્વાસુદેવસ્સનાતનઃ ।
વાલખિલ્યપુરોગશ્ચ વારિદો વસુમાન્વસુઃ ॥ ૫॥

વરેણ્યો વાસુદેવશ્ચ વસુરેતા વસુપ્રદઃ ।
વાયુર્વાચસ્પતિર્વિશ્વં વિષ્ણુર્વિશ્વામરેશ્વરઃ ॥ ૬॥

ઓઙ્કારશ્ચ વષટ્કારઃ સોમગ્રહપુરોગમઃ ।
ગ્રહનક્ષત્રમાલી ચ શિંશુમારશરીરવાન્ ॥ ૭॥

શરણ્યશ્શઙ્કરશ્શમ્ભુઃ કાલાત્મા કાન્તિવર્ધનઃ ॥

કામદેવઃ કામહર્તા વિરાડ્વીરાસનસ્થિતઃ ॥ ૮॥

વિસ્તારભૂમા ભૂતેશો વિશ્વગુપ્તનુરીશ્વરઃ ।
મન્દેહરિપુરિન્દુશ્ચ બિન્દુસ્સુન્દરવિગ્રહઃ ॥ ૯॥

સામગાનપ્રિયસ્સાધુસ્સત્યસન્ધસ્સદાશિવઃ ।
સમાત્માસન્ધિરવ્યક્તં સામ્બસ્સારસવર્ધનઃ ॥ ૧૦॥

સૂદસ્સૂક્ષ્મસ્સૂક્ષ્મકાયસ્સૂક્ષ્મદૃક્સુદૃગવ્યયઃ ।
રથાઙ્ગહેતિરમ્ભોજવર્ધનઃ સર્વસમ્મતઃ ॥ ૧૧॥

વજ્રભૃદ્વત્સલો વાગ્મી વાગીશો વાયુવાહનઃ ।
ધર્માત્માઽધર્મશત્રુશ્ચ કર્મસાક્ષી પરન્તપઃ ॥ ૧૨॥

પઞ્ચાનનઃ પઞ્ચમૂર્તિઃ પઞ્ચાઙ્ગી પાપભઞ્જનઃ ।
પરાશરઃ પુણ્યમૂર્તિઃ પુરુહૂતાનુજઃ પરઃ ॥ ૧૩॥

સનાત્સર્વં સહસ્સર્વસ્સર્વગસ્સર્વપોષકઃ ।
સપ્તાશ્વસ્સપ્તરજ્જુશ્ચ સપ્તૈધાસ્સપ્તસારથિઃ ॥ ૧૪॥

સપ્તપ્રિયસ્સપ્તદોગ્ધા મુઞ્જિકેશો મુરાન્તકઃ ।
શુકશ્શુદ્ધશ્શુભાચારસ્સર્વબીજમનાયકઃ ॥ ૧૫॥

કર્તા વિકર્તા ગહનો કારણં કરણં મહત્ ।
અકુણ્ઠવિક્રમશ્શૌરિર્વૈકુણ્ઠો ભગવાન્ભવઃ ॥ ૧૬॥

ભાનુર્હંસસ્સહસ્રાંશુસ્તપનસ્સવિતા પિતા ।
જાતુકર્ણો જયી જ્યાયાન્ મીનાઙ્ગી સિંહપાલકઃ ॥ ૧૭॥

એકોચ્ચસ્સપ્તનીચશ્ચ ષટ્પતિર્માનવલ્લભઃ ।
ઋતુસ્સુદર્શનઃ કાલઃ કુઞ્જરાનનપૂજિતઃ ॥ ૧૮॥

દ્વિજોઽદ્વિજશ્શુચિર્ધીરઃ શ્રીમાન્ મૂર્તિત્રયાત્મકઃ ।
શિવઙ્કરઃ શ્રીભૂતેશસ્સિન્ધુરુચ્ચૈશ્શ્રવા હરિઃ ॥ ૧૯॥

પદ્મપ્રબોધકઃ પદ્મી પદ્મગર્ભઃ પ્રભાકરઃ ।
અહ્નામ્પ્રભુર્દિનમણિર્દૈતેયકુલમૃત્યુકૃત્ ॥ ૨૦॥

કલા કાષ્ઠા મુહૂર્તાત્મા દિનરાત્રિશરીરવાન્ ।
પદ્માપતિઃ પરંધામ પરમાત્મા પરાયણમ્ ॥ ૨૧॥

નિદાનં નિત્યમદ્વૈતં કેવલં મુક્તિકારણમ્ ।
સર્વભૂતશરીરસ્થં ચૈતન્યં બ્રહ્મનિર્ગુણમ્ ॥ ૨૨॥

એકો નૈકઃ કૃતિશ્શાન્તિર્મતિર્બુદ્ધિધૃતિસ્સ્મૃતિઃ ।
મન્ત્રો યન્ત્રં તથાક્ષેત્રં ક્ષેત્રજ્ઞોઽક્ષરસંજ્ઞિકઃ ॥ ૨૩॥

ઇન્દ્રિયાણામધિષ્ઠાતા તત્ત્વં તત્પુરુષાગ્રણીઃ ।
અમાયી માયિનામગ્ર્યો લોકસ્વામી સ્વરાડ્ગુરુઃ ॥ ૨૪॥

પ્રાણદઃ પ્રણવઃ પ્રાણો પ્રાપ્તિસાધનમમ્બરમ્ ।
જગન્મિત્રં પવિત્રં ચ દેવાનામપિદૈવતમ્ ॥ ૨૫॥

સિન્ધુનિદ્રાદ્ધિરણ્યાઙ્ગો સૈંહિકેયવિશોધિતઃ ।
વિષુવચ્છાયનં કાન્તિશ્ચન્દ્રોત્પત્ત્યયનં ગ્રહઃ ॥ ૨૬॥

દિગીશો દેવવૃન્દેશો નક્ષત્રેશો ધનેશ્વરઃ ।
સૂર્યવર્ચાસ્સૂરિરાધસ્સૂર્યાપતિરુમાધવઃ ॥ ૨૭॥

વિભાકરો દ્વાદશાત્મા કપિલઃ કપિશિક્ષકઃ ।
કપિતાતઃ કપિઃ પિઙ્ગઃ પઙ્ગુકાલપિતા હરઃ ॥ ૨૮॥

વિવિક્તસ્સાગરસ્સેતુસ્તામ્રસ્તામ્રરથો રથી ।
મેરુપ્રભસ્સુમેરુશ્ચ બુધનુન્નરથો ભવઃ ॥ ૨૯॥

સહસ્રપ્રગ્રહો ધન્વી મેધાવી શ્રુતિસાગરઃ ।
ભિષક્પિતા ભિષક્સારો ભૈષજં ભવરોગહૃત્ ॥ ૩૦॥

જન્માદિશ્શાસ્ત્રયોનિશ્ચ વિજ્ઞાનં જ્ઞાનમેવ ચ ।
જ્ઞાતા જ્ઞેયં સ્ફુટસ્ફૂર્તિરનીશો નાહવિર્નૃપઃ ॥ ૩૧॥

અવિચ્છિન્નાન્વયશ્શાસ્તા રામો રાજીવલોચનઃ ।
ગાયત્રીવલ્લભઃ પ્રાંશુર્ગેયો ગાતા ગુણાર્ણવઃ ॥ ૩૨॥

સત્યમેધાસ્સમામ્નાયસ્સન્ધાતા કશ્યપાત્મજઃ ।
સર્વધર્મમયસ્સાક્ષી ચિત્કૂટનિલયોઽનલઃ ॥ ૩૩॥

ચિરન્તનશ્ચિદાત્મા ચ વૈશાખશિખિવાહનઃ ।
અશ્વત્થઃ કુશનાભશ્ચ સામ્રાજ્યં જગદીશ્વરઃ ॥ ૩૪॥

દીપ્તમૂર્તિમહામૂર્તિસ્સુતપાઃ ઋતુભુક્પશુઃ ।
યજ્વા જાજ્જ્વલ્યદેહશ્ચ શત્રુમણ્ડલખણ્ડનઃ ॥ ૩૫॥

શરારુધ્વંસકશ્શાસ્તા શાસ્ત્રયોનિર્નિરઞ્જનઃ ।
અનિન્દ્યો નિન્દ્યવિધ્વંસી વિશ્વામિત્રવરપ્રદઃ ॥ ૩૬॥

વિધ્યર્થબોધકો ભાનુર્વિન્ધ્યવીથી પ્લવઙ્ગમઃ ।

તત્પદાર્થોઽહંપદાર્થસ્તત્ત્વમસ્યર્થબોધકઃ ॥ ૩૭॥

ત એતે ત્વમહં દેવયક્ષરક્ષોભયઙ્કરઃ ।
મૃત્યુઞ્જયઃ પાકભેદી સુષુમ્નાતાલશોભિતઃ ॥ ૩૮॥

સહસ્રારામ્બુજારૂઢો કર્ણિકામધ્યમણ્ડપઃ ।
ગુહાશયશ્શિવસ્સ્થાણુર્ગોપ્તા ગુણપતિર્ગિરિઃ ॥ ૩૯॥

ગોમૂર્તિસ્સર્વદેવાત્મા સર્વસન્ધ્યાપ્રવર્તકઃ ।
જ્યોતિષ્માનિન્દ્રશર્મા ચ ચિદાનન્દો દિગમ્બરઃ ॥ ૪૦॥

કિરીટી કવચી ખડ્ગી શઙ્ખી શાર્ઙ્ગી ચ પદ્મકઃ ।
વેત્રી શૂલી નિષઙ્ગી ચ તાપનસ્તપતાં વરઃ ॥ ૪૧॥

શઙ્કરશ્ચારુસર્વાઙ્ગસ્સર્વબન્ધવિમોચકઃ ।
મહાત્મા ચારુસર્વાઙ્ગસ્સર્વભૂષણભૂષિતઃ ॥ ૪૨॥

ભક્તેપ્સિતાર્થસન્ધાનકલ્પવૃક્ષઃ કકુત્પતિઃ ।
બન્ધૂકકુસુમપ્રખ્યસ્સર્વશસ્ત્રભૃતાં વરઃ ॥ ૪૩॥

બ્રહ્મણ્યો બ્રાહ્મણો બ્રાહ્મી રાજર્ષિરમિતપ્રભઃ ।
સનાતનવરસ્સોમસ્સર્વતત્ત્વાવલમ્બનઃ ॥ ૪૪॥

મહાપાતાલસમ્માન્યો માનિનામગ્રણીર્મહાન્ ।
સિદ્ધાર્થકૃત્સિદ્ધગુહ્યઃ સિદ્ધાનામુત્તમાગતિઃ ॥ ૪૫॥

લોકનાથો વિભાનાથો માઠરો મધુવલ્લભઃ ।
તીક્ષ્ણાંશુસ્તીર્થગર્ભશ્ચ શ્વેતલોહિતવાહનઃ ॥ ૪૬॥

કર્મ કર્મવિદાં નેતા સદાવરણમણ્ડલઃ ।
સહસ્રગુરનન્તાત્મા વિશિષ્ટશ્શિષ્ટપોષકઃ ॥ ૪૭॥

દિવ્યમૂર્તિર્દેવસિંહો દિવિષત્પ્રવરો દમઃ ।
વિશાલાક્ષશ્શ્રીમૂર્તિર્વિશ્વભ્ભરવિભાવસુઃ ॥ ૪૮॥

મૂર્ધન્વદિષ્ટદાયી ચ કૃતિચિન્તાનિવર્તકઃ ।
ગન્ધર્વગણગોપ્તા ચ વસ્વાદિગણવન્દિતઃ ॥ ૪૯॥

ગ્રહપો ગ્રહનેતા ચ ગ્રન્થિબન્ધવિભઞ્જનઃ ।
ગ્રસિષ્ણુર્ગ્રહગોપ્તા ચ ગ્રાહી ગ્રાહ્યશરીરભાઃ ॥ ૫૦॥

તપસ્વી તાપસશ્શોચ્યો તરણિર્દ્યુમણિર્મણિઃ ।
ચિન્તામણિર્દિનમણિર્જ્યોતિર્મણિરજેશ્વરઃ ॥ ૫૧॥

છન્દોમયશ્શાસ્ત્રમયસ્સર્વકાન્તિખનિર્મનુઃ ।
અનૂરુસારથિઃ પીલો પૈપ્પલો ત્રિવિલોચનઃ ॥ ૫૨॥

ત્રિશિખી બ્રાહ્મણમયો જ્યોતિસ્સિદ્ધાન્તબોધનઃ ।
ત્રિનામા ત્રિશરીરશ્ચ ત્રિકાણ્ડશ્ચણ્ડદીધિતિઃ ॥ ૫૩॥

મુક્તિદ્વારં મુનિવરો મહોરસ્કો મહામનાઃ ।
અન્નપાત્રપ્રદાતા ચ વિષ્ણુચિન્તાપરઃ પુમાન્ ॥ ૫૪॥

આપદામપહર્તા ચ રોગકાણ્ડદવાનલઃ ।
નિવૃત્તાત્મા સમાવૃત્તો ચક્ષુરિન્દ્રિયદેવતા ॥ ૫૫॥

તપોમયસ્તમતનુઃ પૂષા પૂષાદિવન્દિતઃ ।
સર્વજન્તુશરણ્યશ્ચ બહ્વૃચો બહુદાયકઃ ॥ ૫૬॥

કૃષ્ણાત્મા કમનીયશ્ચ સર્વવેદવિભાગકૃત્ ।
કર્ણો વિકર્ણઃ કાન્તશ્ચ બહુભોજી બહુપ્રિયઃ ॥ ૫૭॥

દક્ષિણો દક્ષિણામૂર્તિર્દયાવાન્ દમ્ભવર્જિતઃ ।
સદ્ભૂતિઃ કોશગઃ કોશી સર્વસિદ્ધિપરાયણઃ ॥ ૫૮॥

શિવદેહશ્શિવાત્મા ચ શિવદેહશ્શિવપ્રદઃ ।
વારાણસીવાસપરો હંસતીર્થપ્રવર્તકઃ ॥ ૫૯॥

સૂર્યલિઙ્ગપ્રતિષ્ઠાતા સોમકાન્તિવિવર્ધનઃ ।
સુગ્રહસ્સુખદસ્સૂક્ષ્મસ્ખરસસ્વારિત એવચ ॥ ૬૦॥

સઙ્ખ્યાવાન્સર્વસંસારી સૂરિઃ પરપુરઞ્જયઃ ।
કૃતાગમઃ કૃતવિધિઃ કૃતશાસ્ત્રઃ કૃતાહ્નિકઃ ॥ ૬૧॥

રાજા રાજદ્વિતીયશ્ચ ગ્રહરાજઃ પ્રમાણવિત્ ।
બાડવો બાડવામૂલં હવ્યં કવ્યં પિતૃપ્રિયઃ ॥ ૬૨॥

સમાધિવેત્તા સારાર્થસ્સારદૃક્શારદાપ્રિયઃ ।
રક્તપુષ્પાર્ચનીયશ્ચ રક્તગન્ધાક્ષતપ્રિયઃ ॥ ૬૩॥

પરાર્થ્યાર્થ્યઃ પૂર્ણકાન્તિઃ કૃતતત્ત્વાર્થનિર્ણયઃ ।
નિખિલપ્રાણનિલયો નિત્યમેરુપ્રદક્ષિણઃ ॥ ૬૪॥

પૂર્ણઃ પૂર્ણયિતા પૂજ્યઃ પરમાન્નકૃતાદરઃ ।
પરહિંસાદિરહિતો ગુરુમૂર્તિર્ગતિપ્રદઃ ॥ ૬૫॥

ગોપાલો લોકપાલશ્ચ સર્વસ્સર્વસ્વમચ્યુતઃ ।
મરુદીશો મરુચ્ચક્ષુર્મિત્રો હૃત્તાપનાશકઃ ॥ ૬૬॥

હૃદ્રોગહારી કૌમારી હરિમાદિવિનાશકઃ ।
ઉત્તરાં દિવમારૂઢો હારિદ્રઃ કોકનાયકઃ ॥ ૬૭॥

હ્રીં બીજમધ્યનિલયો નવનાથવિવર્ધનઃ ।
યોગિનીવન્દ્યચરણો બલિગ્રહણતત્પરઃ ॥ ૬૮॥

નિત્યકલ્યાણનિલયો કલ્યાણાચલસેવકઃ ।
કલ્યાણદાનઃ કલ્પાત્માઽત્યુગ્રો રિપુભયઙ્કરઃ ॥ ૬૯॥

ભૂતિકૃદ્ભૂતિભૃદ્ભૂતિર્ભૂતભાવનપૂર્વજઃ ।
ત્રિયુગશ્ચ ત્રિપૃષ્ઠશ્ચ ત્રિપાન્મૂર્તિત્રયાત્મકઃ ॥ ૭૦॥

સર્વવિઘ્નવિનાશી ચ સર્વબન્ધવિમોચકઃ ।
ત્રિશિરાસ્ત્રિપ્રલમ્બશ્ચ ત્રિદંષ્ટ્રસ્ત્રિચતુર્ગતિઃ ॥ ૭૧॥

કુજમિત્રં પિતૃપતિઃ પિતૃકારક એવ ચ ।
શુભાઙ્ગો લોકસારઙ્ગસ્સારઙ્ગોઽરુણસારથિઃ ॥ ૭૨॥

પુણ્યશ્લોકઃ પુણ્યદાયી પુણ્યકારી પુરાતનઃ ।
વિજયો વિષ્ણુરાજશ્ચ વિષ્ણુરાતો ભવાદિહૃત્ ॥ ૭૩॥

વદાન્યશ્ચ વિરાડ્રૂપી વિદ્યાનાથો વિધિર્વિધુઃ ।
પ્રશસ્તગુણસિન્ધુશ્ચ બન્ધુર્વેદાન્તવેદિનામ્ ॥ ૭૪॥

તત્ત્વાર્થમાતા તામ્રાશ્વસ્તરુણસ્તડિદુજ્જ્વલઃ ।
તીર્ણદુઃખસ્તીવ્રવેગો ચન્દનદ્યુતિરાત્મવાન્ ॥ ૭૫॥

અર્કપર્ણસ્નાનતોષી વીતિહોત્રાદિદૈવતઃ ।
એકાક્ષશ્ચૈકચક્રશ્ચ સ્વતેજોભાસ્સ્વયમ્પ્રભઃ ॥ ૭૬॥

પરાગતિઃ પિણ્ડજાનામણ્ડજાનાં ભયાવહઃ ।
ક્રૂરવ્રતઃ ક્રૂરકલ્પો તામસઃ પરવીરહા ॥ ૭૭॥

ષટ્પલ્લવવિધાનજ્ઞષ્ષટ્પલ્લવવરપ્રદઃ ।

શ્રુતિપાદપસઞ્ચારી કોકિલઃ કમલાશ્રયઃ ॥ ૭૮॥

કુષ્ઠવ્યાધિવિનાશી ચ દુષ્ટપીડાનિબર્હણઃ ।
ધૃતપદ્મદ્વયો યોદ્ધા તેજોમણ્ડલમધ્યગઃ ॥ ૭૯॥

સર્વાધિવ્યાધિશમનો સર્વતાપાલિતાપનઃ ।
સર્વસાક્ષી સદુદયઃ સ્વાષ્ટાક્ષર્યધિદેવતા ॥ ૮૦॥

સ્ફોટાદિદોષહારી ચ ગુલ્મદુઃખપ્રભઞ્જનઃ ।
યોજનાર્બુદસઞ્ચારી સાલોક્યાદિપ્રદઃ પિતા ॥ ૮૧॥

ખેટઃ કૃપીટદાયી ચ નગ્નો નલિનવલ્લભઃ ।
કુન્તીપ્રસન્નઃ કૌબેરઃ શ્રીવક્ષાઃ શ્રીનિકેતનઃ ॥ ૮૨॥

અરુણોઽરુણકેતુશ્ચ યુદ્ધપ્રેતગતિપ્રદઃ ।
સંજ્ઞામનોનુકૂલશ્ચ મહેન્દ્રકૃતપૂજનઃ ॥ ૮૩॥

ગરુડાગ્રજસૂતશ્ચ સસ્યાલિસુહૃદૂર્મિકૃત્ ।
ગોધૂમધાન્યનાથશ્ચ વર્તુલાકારમણ્ડલઃ ॥ ૮૪॥

રુદ્રપ્રત્યધિદેવશ્ચ હસ્તનક્ષત્રનાયકઃ ।
ગુઞ્જાપુઞ્જપ્રતીકાશઃ પવિત્રીકૃતવૃત્રહા ॥ ૮૫॥

કાલિન્દીજનકશ્ચૈવ ગોબ્રાહ્મણહિતે રતઃ ।
ઇન્દ્રો વૃદ્ધશ્રવાઃ પૂષા વિશ્વવેદાઃ પ્રજાપતિઃ ॥ ૮૬॥

અગ્નિર્વાયુશ્ચ સૂર્યશ્ચ વાય્વશ્વો રશ્મિપાલકઃ ।
મરીચ્યાત્મા ભુવનસૂરદ્રોહી પુત્રદાયકઃ ॥ ૮૭॥

મહાનામ્નીવ્રતહિતો મહામાનોપરાક્ષસઃ ।
આદિત્યોઽદિતિદેવશ્ચ દિતિદેવો દિવસ્પતિઃ ॥ ૮૮॥

વ્યોમસન્દૃગ્વિમાનસ્થો સુમૃડીકસ્સરોવિભુઃ ॥

સ્મૃતિપ્રત્યક્ષમૈતિહ્યમનુમાનં વિધાયકઃ ॥ ૮૯॥

સતૈસ્સર્વૈસ્સમાવિષ્ટોઽણુર્મહાનધિવત્સરઃ ।
પટરો વિક્લિધઃ પિઙ્ગઃ પ્રદર્શી ચોપદર્શકઃ ॥ ૯૦॥

નાનામુખશ્ચૈવ શીર્ષો ઋતુલક્ષણલક્ષિતઃ ।
શુક્લાત્મા દક્ષિણઃ પક્ષઃ કૃષ્ણાત્મા વામપક્ષકઃ ॥ ૯૧॥

અહોદ્યૌર્વિષુરૂપી ચ વિશ્વાવનવિશેષવિત્ ।
અપશુશ્ચાપશુઘ્નશ્ચ નપશુઃ પશુપાલકઃ ॥ ૯૨॥

સંવત્સરપ્રિયતમઃ પ્રત્યક્ષજ્ઞેયમણ્ડલઃ ।
ષડુદ્યમસ્સપ્તયાત્રો વિનાદી ચાભિધાવકઃ ॥ ૯૩॥

ષષ્ટિવલ્ગસ્સાર્ષ્ટિકશ્ચ પ્રૈષકૃત્પ્રથમસ્સ્મૃતઃ ।
અઘોરાક્ષસ્સદોનાદી વાક્પ્રયોજક એવ ચ ॥ ૯૪॥

સંવત્સરીણઃ કર્મફલપદ્માપીત ઇવોજ્જ્વલઃ ।
કનકોજ્જ્વલવાસાશ્ચ અહતામ્બર એવ ચ ॥ ૯૫॥

કપર્દી વિશિખશ્ચૈવ વાતવાન્મરુતાં મુખમ્ ।
ક્ષપણો યોત્સ્યમાનશ્ચ હેમચક્ષુરકોપનઃ ॥ ૯૬॥

અપધ્વસ્તશ્ચ સન્નદ્ધસ્સહદૃગ્જીવનપ્રદઃ ।
ન દેવો ન મનુષ્યશ્ચ નાગ્નિર્નેન્દ્રો ન મારુતઃ ॥ ૯૭॥

નોપમો રુદ્રધન્વા ચ કર્મબ્રહ્મપ્રપઞ્ચકઃ ।
ઋતુભિસ્સન્નુતસ્સ્વામી સર્વકામધુગવ્યયઃ ॥ ૯૮॥

આરોગ્યસ્થાનભા ભ્રાજઃ પટરસ્થાનભા અપિ ।
સપ્તસૂર્યાર્પિતશ્ચૈવ કશ્યપો મેર્વમોચકઃ ॥ ૯૯॥

વાત્સ્યાયનઃ પઞ્ચકર્ણો સપ્તહોતા ચ ઋક્પતિઃ ।
તસ્થિવાઞ્જગદાત્મા ચ વૈશમ્પાયન એવ ચ ॥ ૧૦૦॥

અનમ્ભા અમ્ભસાં મૂલમગ્નિવાયુપરાયણમ્ ।
કશ્યપસ્યાતિથિશ્ચૈવ સિદ્ધાગમન એવ ચ ॥ ૧૦૧॥

નમ ઉક્તિપ્રિયઃ પુણ્યો અજિરાપ્રભુરેવ ચ ।
નર્યાપાઃ પઙ્ક્તિરાધાશ્ચ વિસર્પી નીલલોહિતઃ ॥ ૧૦૨॥

નીલાર્ચિઃ પીતકાર્ચિશ્ચ વાયુરેકાદશાત્મકઃ ।
વાસુકિવૈદ્યુતશ્ચૈવ રજતઃ પરુષાદિકઃ ॥ ૧૦૩॥

નાસત્યજનકશ્ચૈવ શામ્બરશ્ચાપપૂરુષઃ ।
સુબ્રહ્મણ્યશ્ચ સૂરીન્દ્રો ગૌતમઃ કૌશિકીપતિઃ ॥ ૧૦૪॥

અગ્નિશ્ચ જાતવેદાશ્ચ સહોજા અજિરાપ્રભુઃ ।
કઃ કિં કં તત્સત્યમન્નમમૃતો જીવ એવ ચ ॥ ૧૦૫॥

વ્યયજન્માનુજન્મોઽગ્રસ્સપ્તસપ્તકદૃષ્ટિભાક્ ।
ભાનુર્વિધુશ્ચ ભૌમશ્ચ ચન્દ્રસૂનુશ્ચ ગીષ્પતિઃ ॥ ૧૦૬॥

ઉશના સૂર્યસૂનુશ્ચ તમઃ કેતુસ્તથાદ્રિભૃત્ ।
અર્ધપ્રહારો ગુલિકો યમકણ્ટક એવ ચ ॥ ૧૦૭॥

કારકો મારકશ્ચાપિ પોષકસ્તોષકસ્તથા ।
પશ્ચાલ્લત્તઃ પુરોલત્તઃ પાર્શ્વલત્તસ્તથૈવ ચ ॥ ૧૦૮॥

આકાશગ્રહસંસેવ્યો ધૂમકેતુવિજૃમ્ભણઃ ।
ભૂકમ્પનાદિહેતુશ્ચ રક્તવૃષ્ટિવિધાયકઃ ॥ ૧૦૯॥

ગર્જન્ પર્જન્યરૂપી ચ દુર્જયો દુરતિક્રમઃ ।
નિર્જરારાધ્યચરણો જરામરણવર્જિતઃ ॥ ૧૧૦॥

વિયદ્ગમનજઙ્ઘાલો વીતિહોત્રસમપ્રભઃ ।
વિરિઞ્ચિગર્ભસમ્ભૂતો વિષવ્યાલવિનાશકૃત્ ॥ ૧૧૧॥

શ્રીપુષ્ટિકીર્તિસન્દાયી નમતાં નમનપ્રિયઃ ।
વેદાધ્યયનસમ્પન્નો વેદાન્તેષુ ચ નિષ્ઠિતઃ ॥ ૧૧૨॥

શબ્દશાસ્ત્રપ્રણેતા ચ શબ્દબ્રહ્મમયઃ પરઃ ।
અર્થબ્રહ્મમયોઽર્થાર્થી સ્વાર્થિનામર્થદાયકઃ ॥ ૧૧૩॥

જપયજ્ઞસ્તપોયજ્ઞો દાનયજ્ઞસ્તથૈવ ચ ।
સ્વાધ્યાયયજ્ઞો ધર્મજ્ઞો નીતિજ્ઞો વિજ્ઞ એવ ચ ॥ ૧૧૪॥

ગુહાશાયી ગુહાભેદી સાક્ષાન્મન્મથમન્મથઃ ।
મઞ્જુદેહો મઞ્જુકાન્તિર્મહિમાતિશયોજ્જ્વલઃ ॥ ૧૧૫॥

મિત્રવિન્દાવન્દ્યપાદો મુનિવૃન્દાવને હિતઃ ।
બ્રહ્મચારી સુમેધાશ્ચ ઊર્ધ્વરેતાસ્તપોમયઃ ॥ ૧૧૬॥

ઐઙ્કારનિલયો વાગ્મી વાગર્થપ્રદ એવ ચ ।
હ્રીઙ્કારનિલયો માયી ઇન્દ્રજાલાદિતત્ત્વવિત્ ॥ ૧૧૭॥

શ્રીઙ્કારનિલયશ્શ્રીમાન્ ધનદો ધનવર્ધનઃ ।
શ્રીચક્રરાજનિલયઃ શ્રીદેવીકર્ણભૂષણમ્ ॥ ૧૧૮॥

ક્લીઙ્કારમધ્યનિલયઃ કામરાજવશઙ્કરઃ ।

સૌરશક્તિસહિતો જ્ઞાનદાનદક્ષઃ પ્રકાશકઃ ॥ ૧૧૯॥

પરમાત્માન્તરાત્મા ચ જીવાત્મા ચ નિયામકઃ ।
હૃદયગ્રન્થિભેત્તા ચ સર્વસંશયનાશનઃ ॥ ૧૨૦॥

બ્રહ્મવ્યાખ્યાનનિપુણો યજ્ઞદીક્ષાધુરન્ધરઃ ।
દૌર્ભાગ્યતૂલવાતૂલો જરાધ્વાન્તનિવર્તકઃ ॥ ૧૨૧॥

દ્વૈતમોહવિનાશી ચ ભેદવાદિવિભેદનઃ ।
વીરભદ્રમતધ્વંસી વીરારાધ્યનિબર્હણઃ ॥ ૧૨૨॥

કાપાલિમતકોપી ચ મીમાંસાન્યાયતત્પરઃ ।
કાર્તાન્તિકવરસ્સર્વકાર્તાન્તિકપરાયણઃ ॥ ૧૨૩॥

જઙ્ગમાજઙ્ગમમયો જાનકીપૂજિતઃ પુરા ।
ઇક્ષ્વાકુવંશનાથશ્ચ ઇન્દિરાસ્થાનસુન્દરઃ ॥ ૧૨૪॥

વિદ્યાવિનયવિજ્ઞાન ત્રયીતાણ્ડવમણ્ડપઃ ।
રામચન્દ્રકુલામ્ભોધિઃ કામિનીકામદાયકઃ ॥ ૧૨૫॥

સઙ્ગીતશાસ્ત્રનિપુણઃ સર્વવિદ્યાપ્રવર્તકઃ ।
રાજગ્રહોઽધિકારી ચ રાજરાજેશ્વરીપ્રિયઃ ॥ ૧૨૬॥

રાજ્યં ભૌજ્યં ચ સામ્રાજ્યં વૈરાજ્યં રાજ્યમેવ ચ ।
ગૌઃ પઞ્ચગવ્યં શુદ્ધાત્મા ચાન્દ્રાયણફલપ્રદઃ ॥ ૧૨૭॥

કૃચ્છ્રાદિફલદાયી ચ દારિદ્ર્યભયનાશનઃ ।
દુઃખાર્ણવોત્તારકશ્ચ દુરિતવાતખણ્ડનઃ ॥ ૧૨૮॥

બ્રહ્મહત્યાદિવિધ્વંસી ભ્રૂણહત્યાનિબર્હણઃ ।
ગુરુદ્રોહાદિશમનો માતૃગામિવધોદ્યતઃ ॥ ૧૨૯॥

પઞ્ચાસ્ત્રશસ્ત્રમેધાલિઝઞ્ઝાવાતો ઝષાદિકઃ ।
ચિત્રગુર્દાનશૌણ્ડશ્ચ સિંહસંહનનો યુવા ॥ ૧૩૦॥

વૈધવ્યબાધાશમનો વિધવાનાં ગતિપ્રદઃ ।
રજોદોષવિનાશી ચ કૃતપક્વાન્નગર્હણઃ ॥ ૧૩૧॥

પટ્ટાભિષિક્તભક્તાલિર્દુષ્ટમત્તેભકેસરી ।
અનર્ગલગતિગૂઢો ગોમતીતીરપુણ્યકૃત્ ॥ ૧૩૨॥

જરાયુદોષહારી ચ પૂર્ણાયુર્યોગકારકઃ ।
ભક્તાબ્જપૂર્ણચન્દ્રશ્ચ ધર્મમાર્ગપ્રવર્તકઃ ॥ ૧૩૩॥

સૌવર્ગસુખહેતુશ્ચ નિરયધ્વંસદીક્ષિતઃ ।
ભ્રમન્મણ્ડલસંસ્થાનો ભ્રાન્તિપિત્તાદિરોગહૃત્ ॥ ૧૩૪॥

મેહાદિરોગશમનો પાણ્ડુક્ષયવિનાશનઃ ।
પાપવેતાલમન્ત્રજ્ઞો પાપકૃજ્જનદુર્લભઃ ॥ ૧૩૫॥

જ્વરાદિદોષદૂરશ્ચ વિજ્વરીકૃતભૂસુરઃ ।
મોક્ષનિશ્રેણિકાસાક્ષી દાક્ષાયણ્યાદિસેવકઃ ॥ ૧૩૬॥

ભાવુકો ભદ્રકરુણમશ્વિનીપુષ્કરોજ્જ્વલઃ ।
પ્રશસ્તવાન્નિસ્તુલન પ્રબન્ધશતકલ્પનઃ ॥ ૧૩૭॥

ભૂનેતા ભૂધરો ભોગી ભાગ્યદાયી ભવપ્રિયઃ ।
કર્મન્દી વલલઃ ક્લીબઃ પશુપાલોઽશ્વપાલકઃ ॥ ૧૩૮॥

શનિપીડાવિનાશી ચ કૃત્યાદોષનિબર્હણઃ ।
આભિચારિકવિધ્વંસી ગદાવનદવાનલઃ ॥ ૧૩૯॥

જપપૂજાર્ચનરતો નારાયણપદં પરમ્ ।
પાપપાષાણદલનટઙ્કીકૃતકરાવલિઃ ॥ ૧૪૦॥

મોક્ષલક્ષ્મીકવાટશ્ચ માતૃકાવર્ણમણ્ડનઃ ।
અકારાદિક્ષકારાન્તવર્ણમાલાવિભૂષણઃ ॥ ૧૪૧॥

અનુસ્વારાદિસઙ્ખ્યાત્મા સ્વરો વ્યઞ્જન એવ ચ ।
સર્વાર્થદસ્સર્વકર્મસર્વકાર્યપ્રકાશકઃ ॥ ૧૪૨॥

પઞ્ચવિંશતિતત્ત્વસ્થઃ પઞ્ચબ્રહ્મસમુદ્ભવઃ ।
પારમાર્થિકસન્દાયી પઙ્ગ્વાદિગતિદાયકઃ ॥ ૧૪૩॥

સફલીકૃતપૂજાર્થો વિફલીકૃતદુષ્કૃતિઃ ।
શ્રુતિસ્મૃતિસમામ્નાતસ્માર્તકર્મપ્રકાશકઃ ॥ ૧૪૪॥

યજ્ઞોપવીતધારી ચ યાજ્ઞવલ્ક્યાદિવન્દિતઃ ।
સુષુમ્નાયોગમધ્યસ્થો લમ્બિકાયોગસાધનઃ ॥ ૧૪૫॥

સાલમ્બનોદ્દીપનાદિક્રિયાબીજં મહામનુઃ ।
કલ્પાતિશાયિસઙ્કલ્પો વિકલ્પવિધિવર્જિતઃ ॥ ૧૪૬॥

અનલ્પમૂર્તિરશ્વાત્મા સ્વાત્માનન્દવિધાયકઃ ।
આત્માનાત્મવિવેકજ્ઞો નિરાવરણબોધનઃ ॥ ૧૪૭ ॥

નિદાનભૂતસ્તત્ત્વાનાં નિત્યકલ્યાણસુન્દરઃ ।
શાન્તરક્ષણનિર્નિદ્રઃ શ્રુતિસ્મૃતિશુભદ્રુમઃ ॥ ૧૪૮ ॥

આલાપીકૃતવેદાઙ્ગો માલાલઙ્કૃતકન્ધરઃ ।
રુદ્રાક્ષકઙ્કણલસત્કરો રુદ્રજપપ્રિયઃ ॥ ૧૪૯ ॥

સદાશિવપરબ્રહ્મસ્થાનં શ્રીશમ્ભુવિગ્રહઃ ।
મૂલાધારામ્બુજારૂઢો દહરાકાશમધ્યગઃ ॥ ૧૫૦ ॥

સહસ્રારામ્બુજારૂઢો જ્ઞાનડોલાવિલાસવાન્ ।
વેલોલ્લઙ્ઘનસામર્થ્યો વેત્તા નિર્વૃતિદાયકઃ ॥ ૧૫૧ ॥

સુરભૂસુરદત્તાર્ઘ્યશુદ્ધામ્બુગ્રહણે રતઃ ।
બ્રહ્મવર્ચસ્વિતામૂલં બ્રહ્મશ્રીસૂર્યવિગ્રહઃ ॥ ૧૫૨ ॥

ફલશ્રુતિઃ -
ઇતિ નામાનિ ગૌણાનિ ભાસ્કરસ્ય મહાત્મનઃ ।
કાનિચિદ્વર્ણિતાન્યત્ર દેવસ્યાનન્તરૂપિણઃ ॥ ૧૫૩ ॥

સૂર્યવર્ચઃ કૃતાર્થોઽસિ ત્વમદ્ય ન હિ સંશયઃ ।
દિવ્યાનામપિ યન્નામ્નાં સહસ્રમનુકીર્તિતમ્ ॥ ૧૫૪ ॥

એતસ્ય શ્રવણાદેવ કીર્તનાજ્જીવકોટયઃ ।
તરન્તિ દુસ્તરં ઘોરં સંસારં નાત્ર સંશયઃ ॥ ૧૫૫ ॥

યશ્શૃણોતિ સદા નામ્નાં સહસ્રં ભાસ્કરસ્ય ચ ।
વિદ્યાકામો લભેદ્વિદ્યામર્થાર્થી સાર્થકો ભવેત્ ॥ ૧૫૬ ॥

અનપત્યો લભેત્પુત્રમરાજા રાજ્યમાપ્નુયાત્ ।
ગ્રહપીડા વિનશ્યન્તિ નશ્યન્તિ બ્રહ્મરાક્ષસાઃ ॥ ૧૫૭ ॥

આરોગ્યમાપ્નુયાદ્રોગી કામી કામાનવાપ્નુયાત્ ।
કિમત્ર બહુનોક્તેન સર્વસિદ્ધિર્ભવિષ્યતિ ॥ ૧૫૮ ॥

ધર્માર્થકામમોક્ષાણાં સાધનં સર્વસમ્મતમ્ ।
શ્રુતિસ્મૃતિપુરાણાદિસારાર્થકૃતનિર્ણયમ્ ॥ ૧૫૯ ॥

નામ્નાં સહસ્રં યો ભકયા પઠેન્નિયતમાનસઃ ।
સિધ્યન્તિ સર્વધર્માર્થાસ્તસ્ય નૈવાત્ર સંશયઃ ॥ ૧૬૦॥

વિશ્વાવસુરુવાચ -
નારાયણ નમસ્તેઽસ્તુ ભાનુમણ્ડલમધ્યગ ।
કર્મણામપિ ધર્માણાં સાક્ષી ત્વં બ્રહ્મ નિર્મલમ્ ॥ ૧૬૧॥

અનન્તોઽનન્તનામા ચ શ્રીમાન્ લોકત્રયેશ્વરઃ ।
વિભૂતિઃ કેન વા જ્ઞેયા જ્યોતિષામયનસ્ય ચ ॥ ૧૬૨॥

ગન્ધર્વા ઊચુઃ -
સૂર્ય આત્માઽસ્ય જગતસ્તસ્થુષશ્ચ ત્વમેવ હિ ।
ત્વામૃતે નહિ પશ્યામો જન્તૂનાં શરણં કલૌ ॥ ૧૬૩॥

વાલખિલ્યા ઊચુઃ -
યઃ કર્મસાક્ષી વિદુષાં વરેણ્યં ભર્ગશ્ચ સૂતે સવિતા જગચ્ચ ।
યો વૃષ્ટિદાયી તપનશ્ચ પુષ્ટિદસ્તમેવ દેવં ગતિમામનામ ॥ ૧૬૪॥

વૈખાનસા ઊચુઃ -
કલાશ્ચેન્દોઃ કલાસ્સર્વાઃ કલાભિશ્ચ પ્રપઞ્ચિતાઃ ।
તમેવ કલયામોઽદ્ય ચક્ષુષો રતિદૈવતમ્ ॥ ૧૬૫॥

વૈષ્ણવા ઊચુઃ -
નારાયણાશ્રયો મર્ત્યો નારાયણપરાયણઃ ।
સર્વત્ર વિજયી ભૂયાત્સ એવ સવિતા સ્વયમ્ ॥ ૧૬૬॥

રુદ્રગણા ઊચુઃ -
અષ્ટમૂર્તેરિયં મૂર્તિરેકા દીપ્તિમયી યતઃ ।
એનં ભજામ લોકેશં ભાનુમણ્ડલમધ્યગમ્ ॥ ૧૬૭॥

શ્રીસૂત ઉવાચ -
બૃહસ્પતિસ્સુરાચાર્યઃ કૃપયા પરયા મુદા ।
સૂર્યવર્ચસમિત્યુક્ત્વા વિરરામોમિતિ સ્વયમ્ ॥ ૧૬૮॥

વ્યાસપ્રસાદાચ્છ્રુતવાનહમેતન્મહર્ષયઃ! ।
ભવન્તસ્સર્વધર્માર્થસિદ્ધ્યૈ નિત્યં પઠન્તિવદમ્ ॥ ૧૬૯॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે સૂર્યસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by DPD

*Shri Surya SahasranAma Stotram from Skanda Purana*

pdf was typeset on October 30, 2020

Please send corrections to *sanskrit@cheerful.com*